Roll No.........................

Signature of Invigilator .........

| Paper Code |
|---|
| BV-103 |

# पतंजलि विश्वविद्यालय

## University of Patanjali
## Examination Jan. – Feb. -2022

### बी. ए. व्याकरण, प्रथमसत्रम्
### व्याकरणम्, तृतीयपत्रम्
### संस्कृतसाहित्यम्

समयः - होरात्रयम् | पूर्णाङ्काः ७०

---

निर्देशः अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

## (खण्ड -क)

प्र01. पृष्टयोः द्वयोर् एकस्य समाधानं कुरु। ( 5 x1 =5)

1. शास्त्रकारस्य जीवनपरिचयं लिखत।
2. वृद्धसंयोगं स्वशब्दैर् व्याख्यायताम्।

प्र02. पृष्टेषु त्रिषु द्वयोः शब्दार्थालङ्कारपुरस्सरं व्याख्यां कुरु। ( 5 x2 =10)

1. एषत्रयी धर्मश्चतुर्णां वर्णानांमाश्रमाणं च स्वधर्मस्थापनादौपकारिक कः। स्वधर्मो ब्रहमणस्याध्ययनमध्यापनं यजनं याजनं दानं प्रतिग्रहश्चेति। क्षत्रियस्याध्ययनं यजनं दानं शस्त्राजीवो भूतरक्षणं च। वैश्यस्याध्ययनं यजनं दानं कृषिपाशुपाल्ये वाणिज्या च।

2. विद्याविनयहेतुरिन्द्रयजयः कामक्रोधलोभमानमदहर्षत्यागात्कार्यः।
कर्णत्वगक्षिजिह्वाघ्राणेन्दियाणां शब्दस्पर्शरूपस्य गन्धेष्वप्रतिपतिरिन्द्रियजयः।
शास्त्रार्थानुष्ठानं वा।। कृत्स्नं हि शास्त्रमिदमिन्द्रियजयः।
तद्विरुद्धवृतिवरयेन्द्रियश्चातुरन्तोऽपि राजासघो विनश्यति।।

3. स्वाभ्यामात्यजनपददुर्गकोशदण्डमित्रव्यसनानां पूर्वं पूर्व गरीय इत्याचार्याः। नेति भारद्वाजः। स्वाव्यामात्यव्यसनयोरमात्यव्यसनं गरीय इति। मन्त्रोमन्त्र फलावाप्तिः कर्मानुष्ठानमायव्ययकर्म दण्डप्रणयानममित्राटवीप्रतिषेधो राज्यरक्षणं व्यसनप्रतिकारः कुमाररक्षणमभिषेकश्च कुमाराणामायत्तमामात्येषु।।

## (खण्ड -ख)

प्र01. पृष्टेषु त्रिषु द्वयोः अलङ्कारादिपुरस्सरं व्याख्यां कुरु। ( 5 x2 =10)

1. उद्धृतरोषमिव मे हृदयं सहर्षं प्राप्तं रणोत्सवमिमं सहसाविचिन्त्य।
इच्छामि पाण्डवबले वरबारणानामुत्कृत्तदन्तमुसलानि मुखानि कर्तुम्।।

2. रोषाकुलाक्षः स्फुरिताधरोष्ठस्तृणाय मत्वा रिपुमण्डलं तत्।
   उत्सादयिष्यन्निव सर्वराज्ञः शनैः समाकर्षति गाण्डिवज्याम्।।
3. यदि लवणजलं वा कन्दरं वा गिरीणां ग्रहगणचरितं वा वायुमार्गप्रयासि।
   मम भुजबलयोग प्राप्त संजातवेगं भवतु चपलः चक्रं कालचक्रं तवाद्य।।

प्र02. पृष्टेषु त्रिषु द्वयोः समाधानं कुरु। ( 5 x2 =10)

1. दूतवाक्यस्य अङ्कसारं लिखत।
2. कञ्चुकीयस्य विषये स्वशब्दैः लिखत।
3. नाटके धृतराष्ट्रस्य परिचयं प्रस्तूयताम्।

प्र03. पृष्टेषु त्रिषु द्वयोः समाधानं कुरु। ( 5 x2 =10)

1. श्रीकृष्णस्यचरित्रचित्रणम् लिखत।
2. दुर्योधनस्य चरित्रस्य चित्रणं कुरु
3. भासस्य जीवनपरिचयं नाटयरचना कौशलं च प्रकत्यत।

## ( खण्ड -ग)

प्र01. पृष्टेषु त्रिषु द्वयोः समाधानं कुरु । ( 5 x2 =10)

1. काव्यस्य प्रयोजनं वर्णयतु।
2. लक्षणायाः स्वरूपोदाहरणं प्रस्तूयताम्।
3. लक्षणामूलाव्यज्जनायाः स्वरूपं प्रकटयतु।

प्र02. पृष्टेषु त्रिषु द्वयोः समाधानं कुरु। ( 5 x2 =10)

1. व्यञ्चनायाः स्वरूपं भेदौ च प्रकटयतु।
2. कारिका पूरयित्वा व्याख्यां कुरु।
   संयोगो विप्रयोगश्च ................।
3. काव्यस्य लक्षणं प्रस्तूयैकमुदाहरणं दीयताम्।

प्र03. पृष्टेषु त्रिषु द्वयोः लक्षणोदाहरणं प्रस्तूयताम्। ( 2.5 x2 =05)

1. अनुष्टुप्।
2. आर्या।
3. उपजाति।

---------------x---------------